M. T. B. COLLEGE, SURAT
Manuscripts Library

No. Ref. ____
Ser. 216

Title: Tristhali Setu Sara

216

Incomplete

Tristhali Setu Sara	Title
	Author
	Editor
	Year, Vols.
	Publisher
216	Remarks

ता च स्वसा मातुलो दौहित्रो भागिनेयकः । पितृष्वसा मातृष्वसा श्वश्रू रोग हरिःॐ
दौ । रिःॐ धवलं एतेस्युः पितरस्तीर्थे तर्पणे च महालये । पितेति पित्रादित्रयमि
त्यर्थः एवं मात्रेत्यपि ज्ञेयं ॥ एवं सर्वान् पितॄन् संतर्प्य एकं तिलांजलिं सर्वेभ्यो दद्यात्
तत्र मंत्रो मैत्रायणीये ॥ आब्रह्मस्तंबपर्यंतं देवर्षिपितृमानवाः । तृप्यंतु पितरः
सर्वे मातृमातामहादयः । अतीतकुलकोटीनां सप्तद्वीपनिवासिनां । आब्रह्म
भुवनाल्लोकादिदमस्तु तिलोदकं । पूर्वोक्तसकलतर्पणाशक्तो तु आब्रह्मेत्यादि
श्लोकद्वयात्मकेनैव मंत्रेण सकृत् त्रीन् तिलांजलीन् दद्यात् । अत्र त्र्य
ञ्जलिमंत्रावृत्तिः संध्यार्घ्यवदित्येके । अन्ये तु श्रुत्यंतिशतप्रत्यये न समा
नकालतावगमात् द्वितीयक्रियमाणानुवादितया करणत्वाभावात्सकृदेव मंत्रं
पठन्त्यंजलित्रयं × युवा सुवासा × द्यादित्याहुः ॥ ॥ अथ वर्ज्यतर्पणे तिलनिषेधः ।
मार्गः । भानौ भौमे त्रयोदश्यां नंदाभृगुमघासु च । पिंडदानं मृदास्नानं न
कुर्यात्तिलतर्पणमिति मरीचिः । संध्यायां रविवारे च गृहे जन्मदिने तथा । भृत्य
पुत्रकलत्रार्थी न कुर्यात्तिलतर्पणं । पक्षयोरुभयोराजन् सप्तम्यां निशि संध्य
योः । विद्यापुत्रकलत्रार्थी तिलान् सप्तसु वर्जयेत् । स्मृत्यर्थसारे । विवाहे चोपन
यने चौले सति यथाक्रमं ॥ वर्षमर्धं तदर्धं च नेत्येके तिलतर्पणं । हद्धोसंत्यां च
तन्मासि न स्यात् कुर्याद्वा तिलतर्पणमिति । अयं तीर्थतर्पणे न प्रवर्तते । तीर्थे तिथिविशे
षे च गयायां प्रेतपक्षके । निषिद्धेपि दिने कुर्यात्तर्पणं तिलमिश्रितमिति
वचनात् ध्रुवायां पितीर्थे तर्पणं कार्यं । तर्पणं च सह कार्यं भर्तुः कुशतिलो
दकैः । तत्पितुस्तत्पितुश्चापि नामगोत्रादिपूर्वकमिति स्कांदोक्तेः ॥ तीर्थे नैमि
त्तिकतया सुतरां तदधिकारात् । द्वंद्वपुत्रपौत्रादि भावविषयकमिति म
दनपारिजातकारादयः ॥ सन्यासिना तु तर्पणं न कार्यं । न कुर्यात्सूतकं भि
क्षुः श्राद्धपिंडोदकक्रियामिति स्मृतेः ॥ ॥ इति तीर्थतर्पणविधिः ॥ ॥
अथ नदीनां रजोदोषः । व्याघ्रपादः । सिंहकर्कटयोर्मध्ये सर्वा नद्यो रजस्वलाः
। तासु स्नानं न कुर्वीत वर्जयित्वा समुद्रगा इति । भविष्योत्तरे आदौ तु कर्कटे देवि
महानद्यो रजस्वलाः । त्रिदिनं तु चतुर्थेह्नि शुद्धाः स्युर्जाह्नवी यथा महानद्यश्च
ब्रह्मपु० गोदावरी भीमरथी तुंगभद्रा च वेणिका । तापी पयोष्णी विंध्यस्य द
क्षिणे तु प्रकीर्तिताः । भागीरथी नर्मदा च यमुना च सरस्वती । विशोका च वितस्ता
च विंध्यस्योत्तरतस्त्विमा । द्वादशैता महानद्यो देवर्षिक्षेत्रसंभवाः इति । अल्प
नदीषु तु अगस्त्योदयावधि रजस्वला इत्युक्तं माहात्म्ये । यावन्नोदेति भगवान् द
क्षिणाशाविभूषणं । तावद्रजोवहा नद्यः कृतोरयाः प्रकीर्तिताः इति । कर
तोयाः स्वल्पोदकाः । गंगादिविषये तु देवलः । गंगा च यमुना चैव प्लक्षजाता
सरस्वती । रजसा नाभिभूयंते ये चान्ये नदसंज्ञिताः । शोणसिंधुहिरण्याख्
ख्याः कोकलोहितघर्घराः ॥ शतद्रूश्च नदाः सप्तपावनाः परिकीर्तिताः
अयं च रजोदोषस्तीरवासिनां नास्ति तदुक्तं निगमे । न तु तीरवासिनामि
ति । योगयाज्ञवल्क्यः अजागोमहिषीचैव ब्राह्मणी च प्रसूतिका ॥ भूमे ति
ष्ठोदकं चैव दशरात्रेण शुध्यति नूतनवानि तु कूपादकं नवोदकं व
सिष्ठः उपाकर्मणि चोत्सर्गे प्रेतस्नाने तथैव च । चंद्रसूर्यग्रहे चैव रजोदो

यंकार्यमुकेरवौ। रोमखं मुंगहकुत्स्य पितृन्स्वा शाप्नते यमः। तथा विवाहमौञ्जिचूडासु वर्षमर्धं न तदर्धकं। अंतर्वत्न्यां च जायायां नेष्यते केशवापनं मिस्यादिप ॥ इति मुंडनविचारः॥ ॥ अथ तीर्थस्नानं॥ ॥ तत्रापत्ररुद्ध च विशेषे विपरीतप्रवाहादि तत्र न कार्यं। तदुक्तं। प्रस्याद्रोदकस्नानं वर्ज्यं नखादिभिरिति। अस्य गंगायामपवादः। प्रतिस्रोतोरजोयोगो रथ्याजलनिवेशनं। गंगायां न प्रदुष्यंति साहि धर्मद्रवा स्वयमिति निबंधांतरमपि। शाल्मली तिंतिणी निंब करंजाश्च हरीतकी। कोविदारकपित्थार्कबदर्यैरंडशिग्रवः॥ शेलुश्च खदिरश्चैषां स्नानं छायासु वर्जयेत्। बदरी च विभीतकिरिति पाठांतरं। यच्च रात्रिसंध्यादिषु निषेधः सोप्याकस्मिकतीर्थप्राप्तौ न प्रवर्तते॥ ॥ तदाह याज्ञवल्क्यः। ग्रहणोद्वाहसंक्रांतिप्रभृतिप्रसवेषु च। स्नानं नैमित्तिकं ज्ञेयं रात्रावपि तदिष्यते॥ महानिशा तु विज्ञेया मध्यस्थं प्रहरद्वयं॥ एतद्यामौ प्रहरद्वयविषयं॥ प्रदोषः पश्चिमो यामो दिनवत्स्नानमाचरेत् इति पराशरोक्तेरिति केचित्॥ ॥ तीर्थस्नाने विशेषः। मार्कंडेयपुराणे। मातरं पितरं जायां भ्रातरं सुहृदं गुरुं। यमुद्दिश्य निमज्जेत अष्टमांशं लभेत सः। स्मृतिदर्पणे। दर्भमांशं लभेत स इति पाठः ४ द्विरुपनिम४ ॥ पैठीनसिः प्रतिकृतिं कुशमयीं तीर्थवारिणि मज्जयेत्। यमुद्दिश्य सोष्टभागं फलं लभेत्॥ तत्र मंत्रः। कुशोसि कुशपुत्रोसि ब्रह्मणा निर्मितः स्वयं। त्वयि स्नाते स च स्नातो यस्येदं ग्रंथिबंधनमिति। कुशप्रतिकृतिः कुशप्रतिमैव कार्येत्येके। ग्रंथिबंधनमिति मंत्रलिंगात् तन्मात्रं ग्रंथिबंधनमात्रं प्रतिकृतिरित्यपरे॥ इदं परार्थस्नानं प्रतिकृतिस्नापनं च जीवतामेवोद्देशेन कार्यं। मृतानां तु तर्पणश्राद्धादिकमात्क्रमेत्याहुः। तथा चंडाबालिः। प्रवाहाभिमुखो मज्जेद्यत्रापः प्रवहंति वै। स्थावरेषु च सर्वेषु आदित्याभिमुखस्तथेति। स्नानमंत्रश्च प्रभासखंडे। ॐ नमो देवदेवाय शितिकंठाय दंडिने। रुद्राय चापहस्ताय चक्रिणे वेधसे नमः। सरस्वती च गायत्री देवमाता गरीयसी। संनिधात्री भवत्वत्र तीर्थपापप्रणाशिनी। सर्वेषामेव तीर्थानां मंत्र एष उदाहृतः। इत्थं प्रार्थ्य नमस्कृत्वा स्नानं कुर्याद्यथाविधि। अत्र [illegible] कार्यं नमस्कृत्वा इत्युक्तेः अयं मंत्रो न स्नाने करणं किंतु नमस्कारे एवेति मंत्रलिंगबाधः स्यात्। पद्मपुराणे मंत्रः। सागरस्य तु निर्मथ्य सदंडहस्तासुरांतक। [illegible]गर्वमर्दिन नमामि त्वां सुरेश्वर। तीक्ष्णदंष्ट्र महाकाय कल्पांतदहनोपम। भैरवाय नमस्तुभ्यं अनुज्ञां दातुमर्हसि। इमं मंत्रं समुच्चार्य तीर्थस्नानं समाचरेत्। अन्यथा तत्फलस्यार्धं तीर्थेशो हरति ध्रुवं। अनयोश्च मंत्रयोः प्रार्थनार्थैककार्यकत्वाद्विकल्पः॥ ॥ इति स्नानविधिः॥ ॥ अथ तर्पणं॥ दक्षादौ स्वशाखानुसारेण स्नानांगं कृत्वा पश्चात्तथैव देवर्षीणां तर्पणं कृत्वा श्राद्धं त्यागं च पितृणामपि कार्यं॥ तत्र तर्पणक्रमः। आदौ पिता ततो माता सापत्नजननी तथा। मातामहाः सपत्नीका आत्मपत्न्यस्तदनंतरं। सुतभ्रातृपितृव्याश्च मातुलाश्च सपत्निकाः। दुहि

मुनैर्भिषं पुष्कलैं गयामिति पाठः। विशालं पुष्करं गयामिति क्वचित्पाठः। नचास्य प्रयागे वपनं कुर्यादित्या। द्विवचनांतरैर्विशेषोपसंहारश्चतुर्थाकरणवदिति वाच्यं। सर्वतीर्थेष्विति सामान्यविधेः सर्वशब्दबहुवचनबलादशेषपरतायाः स्पष्टत्वादुपसंहारासंभवात्। यदेव विद्ययेति वत्। तदुक्तं। सामान्यविधिरस्पष्टः संह्रियेत विशेषणैरिति। इदं च मुंडनं दशमासानंतरं पुनस्तीर्थप्राप्तौ च कर्तव्यं। संवत्सरे द्विमासोने पुनस्तीर्थं व्रजेद्यदि। मुंडनं चोपवासं च ततो यत्नेन कारयेत् इति स्मरणात्। दशमासोत्तरप्राप्तावावश्यकं कार्यं। अंतरालिके इच्छया भवति। न तु नियमत इति यत्नेनेत्यस्यार्थः॥ प्रयागे तु विशेषो वक्ष्यते॥ मुंडने संकल्पश्च वपनं कारयिष्ये इति वापनं करिष्ये इति वा। न तु वपनं करिष्ये इति। वपनस्य नापितकर्तृकत्वात्। गंगायां भास्करक्षेत्रे वपनं यो न कारयेत्। इति वचनस्वरसात् इति केचित्। बहुवचनकेशवियोगसंविधानरूपस्य वपनस्य स्वकर्तृकत्वे बाधकाभावात्॥ यानि कानि च पापानि ब्रह्महत्यासमानि तु। केशानाश्रित्य तिष्ठंति तस्मात्केशान्वपाम्यहं इति मंत्रलिंगाद्वपनं करिष्ये इत्येव संकल्प इत्याहुः। इदं च वपनं केशश्मश्रुक्रमेण कार्यं। गत्वा स्नानं प्रकुर्वीत वपनं तदनंतरं। वपेत्केशांश्च श्मश्रूणि नखानि च निकृंतयेदिति ब्रह्मपुराणवचनादिति केचित्। अन्ये त्वेतद्वचनस्य वपनमात्रविधायकत्वात् क्रमस्याविधानेन गौरवाद्वाक्यभेदप्रसंगाच्च। देवा वै यज्ञं कुर्वते त्याम्नाते राज्ञः प्रथमं वपनविधापूर्वकं श्मश्रूण्यादिवपनमत्रं। सा या आपस्तंबानां तु श्रौते प्रतीतेश्च श्मश्रुकूर्चयोरादौ वपनमित्याहुः। तत्रापि पुरस्तात्स्थाप्ये दक्षिणश्मश्रुवपनमादौ। पित्रादिमृतौ तु दक्षिणसंरक्षणात्॥ वामश्मश्रुवपनमादाविति वपनप्रकारश्चापरार्के। उदङ्मुखः प्राङ्मुखो वा वपनं कारयेत्सुधीः। केशश्मश्रुलोमनखान्युदक्संस्थानि वापयेदिति। तत्र कक्षोपस्थवर्जं शिखावर्जं यतिभिः क्रतुसंधिषु वापयेदिति क्रतुसंधिष्वेवेति परिसंख्यानात्। क्रतुसंधिव्यतिरिक्तकाले तीर्थप्राप्तावपि न कार्यं। यतिशिष्टानामाचारोप्येवमेव। आहिताग्निस्तु पर्वव्यतिरिक्तकाले पितृतीर्थनिमित्तकमुंडनं कार्यं। एतस्य नैमित्तिकत्वात् पित्रादिनिमित्तकमुंडनवत् अनियमान्नाभावात्। आचाराच्च। जीवत्पितृकेणापि तीर्थे मुंडनं कार्यं। विना तीर्थं विना यज्ञं मातापित्रोर्मृतिं विना। यो वापयति लोमानि स पुत्रः पितृघातक इति वचनात्। तत्रापि तीर्थांतरे आद्ययात्रायामेव। प्रयागे तु प्रतियात्रमित्याहुः। तीर्थे च मुंडनं निषिद्धकालेपि कार्यं। निषेधश्च वृद्धगार्ग्येण दर्शितः॥ रव्यारसौरिवारेषु रात्रौ पाते व्रतेऽहनि। श्राद्धाहः प्रतिपद्रिक्ता भद्राः क्षौरेषु वर्जयेत्। आरो भौमः। सौरिः शनिः। पातो व्यतीपातः। रिक्ता चतुर्दशी नवमी चतुर्थी। भद्रा द्वितीया सप्तमी द्वादशी च। गार्ग्यः। षष्ठ्याममायां पर्वणि माघातः। चतुर्दशी सप्तमी तथा। आसु संनिहितं पापं तिष्ठेत्तैले भगे क्षुरे। व्यासः। नक्षत्रेण न कुर्वीत यस्मिन्जातो भवेन्नरः। न प्रोष्ठपदयोः कार्यं नैवाग्नेये च भारत। दारुणेषु तु सर्वेषु प्रत्यरौ च विवर्जयेत्। कुंभे कर्कटके चैव कन्या

यांनेरंतर्येणानुष्ठानं। तस्मात्प्रारब्धोक्तकर्माभावोनैतद्विषयः। अतएवसहस्रभो
जनादौसूतकंभवत्येवेत्याहुः। उभयत्रापिप्रारब्धेसूतकेसत्याशौचकालेतत्रैव
पारिकरुण्यमशुद्धौसत्यांगच्छेत्। इतिसिद्धं। ननु विवाहदुर्भिक्षेषुयात्रायांतीर्थक
र्मणि। नतत्रसूतकंतद्वत्कर्मयज्ञादिकाः। इत्यादिलिपेठीनसीवचनं। तन्मार्ग
वैषम्यादिनागृहांतराभावेसतितीर्थयात्रायामाशौचंनास्तीत्येवंपरं। अनयैव
दिशारजस्वलास्त्रीचत्वारिदिनान्यतिवाह्यपंचमेहनिव्रजेत्। दैवेकर्मणिपि
त्र्ये च पंचमेहनिशुद्ध्यतीतिवचनात्। यात्रायांच दैवकर्मत्वात्तीर्थयात्रायांस्त्रा
नश्राद्धत्रयंतदुपवासक्षौरेतुउद्देश्यएवतीर्थेएवेतिकेचित्। तीर्थयात्रायै
चलितस्तीतोयदिदैवात्पराहतस्तदाविशेषोगरुडपुराणेदर्शितः। तीर्थेचलि
त्वायःकोपिपुनरायातिवैगृहे। अनुज्ञातस्तुभैर्विप्रैःप्रायश्चित्तंसमाचरेत्
भित इतिसंकल्पस्यबाधकनिमित्तकभावः। तथाचात्रैव। यस्तीर्थसंमुखोभूत्वाप्र
व्रजन्गतंनेकने। चेन्मियेदंतराळेतुकल्पीणांमंडळंव्रजेत्। अनशनेमासो
पवासादिरूपोपवासव्रतेचकृतेइतिचकारोध्याहार्यः। द्विविधस्याप्यंतरा
ले मृतस्यकल्पिलोकप्राप्तिर्भवतीत्यर्थः। यदातु अंतराकर्मनाशायांनौ
मनदीपतितातदातज्जलस्पर्शोयथानभवतितथागंतव्यं। कर्मनाशाजलस्प
र्शात्करतोयाविलंघनात्। गंडकीबाहुतरणात्पुनःसंस्कारमर्हतीतिवचनात्
। प्राच्यास्तु करतोयाजलस्पर्शात्कर्मनाशाविलंघनादितिपठंतितन्न
करतोयांकुरुभंशज्ञिराज्ञोपोषितोनरः। अश्वमेधसहस्रस्यफलंप्राप्नोतिविगा
ह्यच यतःश्रुतिरितिभारतेदानधर्मेपुस्नानप्रदर्शनात्॥ यात्राकर्तुस्त्वा
न्नेनोत्रसर्वेतीर्थेषु निगच्छतानित्यमन्नेनोब्रह्मचारिणोनिस्मृतेः॥ ॥
इतियात्रानियमाः॥ ॥अथतीर्थप्राप्तिदिनकृत्यं॥ ॥यानानितुपरि
त्यज्यभाव्यंपादचारेनरैः। लुठित्वाळोठनीत्येवकेवाकार्पटिकाळोतिलोठ
नीलुठितेतिसाष्टांगप्रणम्येत्यर्थः। अष्टांगप्रणामस्तु। पद्भ्यांकराभ्यांजा
नुभ्यांउरसाचोवचसातथा। मनसावचसादृष्ट्याप्रणामोष्टांगउच्यते। क
त्वाकार्पटिकामिति। यद्यपिचात्रकर्मकर्तृकर्तिनक्तितातदाप्रवेशादिनेकार्ये
त्यर्थः। ततःगत्वास्नानंप्रकुर्वीततवपनंतदनंतरं। स्नानंसचैलं। सचैल
मात्स्येतन्कुमकेइतिकाशीखंडात्॥ ॥अथतीर्थोपवासः॥ ॥नवका
शीखंडे॥ यदह्नितीर्थप्राप्तिःस्यात्तदहःपूर्ववासरे। उपवासःप्रकर्तव्यो
प्राप्तेह्निश्राद्धदोभवेत्॥ ॥इतितीर्थप्राप्तिपूर्वदिनेउपवासोविहितः
प्रभासखंडेतु उपवासंततःकुर्यात्तस्मिन्नहनिसुव्रतइतितीर्थप्राप्तिदिने॥
तथाच मुंडनंचोपवासस्य स्वरूपमात्रविधौकाळेदयस्योत्पन्नस्यशिष्ट
स्यतुल्यबळत्वेनाग्निहोत्रेपयोदध्यादिवद्विकल्पः। तत्राद्यपक्षेप्राप्तिदिने
तीर्थश्राद्धशेषभोजनमपिसंभवति। द्वितीयेतु श्राद्धशेषस्यतुआघ्राणंकृ
त्वोपवासएवादुष्याद्दिवत्॥ ॥अथतीर्थेमुंडनं॥ ॥देवलः मुंडनंचोप
वासस्यसर्वतीर्थेष्वयंविधिः। वर्जयित्वाकुरुक्षेत्रंविशालंविरजंगयां॥ वि
रजामुक्तलंकेरो। यत्रधर्मभ्राजेनगम्यामुरनाभोविरजाक्षेत्रस्थापितः। इ
तिवायवीये। दक्षिणदेशस्थलोणारक्षेत्रंविरजमित्यादिपुराणे। कृपि
स

श्रीगणेश

शेनगंतव्यमित्येवंपराणीत्याहुः। भ्रातरस्तुयदिविभक्ताः पृथगपद्युगपद्वाती
र्थगताक्षराःपृथक्श्राद्धंकुर्युः। अविभक्तास्तुयुगपद्गतावेज्येष्ठेनैवकार्यं। ए
केनैवाविभक्तेनकृतेसर्वैस्तुयुतत्कृतमितिवचनात्। विधवातुसपुत्राचेन्नकार्यं। स
पुत्रायानकर्तव्यंभर्तुश्राद्धंकदाचनेतिस्मृतेः। अपुत्रायातुकार्यमेव। अपुत्रापुत्रव
त्पत्नीतिवचनात्। केचित्तुपुत्रवत्यापिपुत्रासंनिधानेब्राह्मणद्वाराश्राद्धंकारणीय
२ मित्याहुः। सांकल्पेचवर्ज्यान्यावाहनासिद्धः। स्वाहाकआवाहनंस्वधाशब्दमर्घ्यादौ
करणंतथा। विकिरंपिंडदानंचसांकल्पेषाडुपवर्जयेत्। प्राचेस्तेहरिवंडे। एतच्चानु
पनीतेपिकुर्यात्सर्वेष्वपर्वस्तुइति स्मृत्यर्थसारे अनुपनीतास्त्रीशूद्राश्चश्रा
द्धमन्त्रवर्जंकारयेयुः। स्वयंवामंत्रवर्जंनाममोत्राभ्यांकुर्युः। देवेभ्योनमःस्वधापितृ
भ्योनमइतिमंत्राभ्यांवेति॥ ॥अथाधिकारापवादः॥ ॥नत्र्यहानिनानकार्यं। न
कुर्यात्सूतकेभिक्षुःश्राद्धपिंडोदकक्रियामितिवचनात्। पतितोपिनकुर्यात्। द्वि
जातिकर्मभ्योहानिःपतनमितिवचनात्। उपपातकादिनातुकार्यमेव। तस्यनि
त्यनैमित्तिकयोर्निषेधाभावात्॥ ॥अथतीर्थश्राद्धेसंप्रदाननिर्णयः॥ ॥गया
तिरिक्ततीर्थेषुपितृपार्वणंमातामहपार्वणंचेतिषड्दैवत्यं। कर्षूसमन्वितंमुक्त्वातद
न्यश्राद्धषोडशं। प्रत्याब्दिकंचशेषेषुपिंडाःस्युःषडितिस्थितिरितिस्मृतिरुक्ताव
द्वीकारादयः। स्मृत्यर्थसारेतु। तत्रमातुःश्राद्धंपृथक्पत्न्यास्तमितिवचनादेके
नाकृतत्वमुके। अन्येतुमातामह्यादिपार्वणमपिपृथगित्याहुः। पित्रादिनवदै
वत्यंतथाद्वादशदैवतमितिअग्निपुराणोक्तेः। विकल्पार्थस्तथाशब्दः। मातृमाता
महीपार्वणेयदापृथक्नस्तस्तदापित्रादीनांमातामहादीनांचसपत्नीकत्वेननिर्दे
शःकार्यः। मात्रादीनांपृथक्श्राद्धपक्षेतुयदिताःकृतसहगमनास्तदाभर्तारं
तांश्चोद्दिश्यसहैवायुग्मब्राह्मणभोजनं। पिंडोपिचोभयोद्देशेनएकएवेतिम
दनपरिजातकारादयः। हेमाद्रिप्रभृतयस्तुसांवत्सरिकमात्रेसहैवकार्यंतीर्था
दौपृथगेवदेयमित्याहुः। सपत्नमातृसपत्नपितामहीसपत्नप्रपितामहीभ्योपि
तीर्थेदद्यात्। सपत्नमातामहेभ्योपि। मातृसपत्नीनांतुपुत्रवतीनांकृपयासप
त्नीपुत्रोदद्यात्। एवंपितृव्यादिभ्योपिदेयं। तत्रैकोद्दिष्टमेव। पितृव्यभ्रातृ
मातुलानामेकोद्दिष्टंसहैवहीतिज्ञानकृण्वर्यवचनात्। अनेमातृग्रहणात्सपत्नमातृ
परमितिहेमाद्रिः। अत्रैभगिन्येपुत्रायस्वामिनेमातुलायच। मित्रायगुरवेश्रा
द्धमेकोद्दिष्टंनुपार्वणमितिस्कंदोक्तेः। यत्तुवचनं। पितृव्यभ्रातृमातृणामपुत्रा
णांतथैवच। मातामहस्यपुत्रस्यश्राद्धं। क्षिप्तवद्भवेदिति। तदावश्यकतयानु
ष्ठेयार्थंनतुपार्वणविधानेनतुल्यत्वार्थं। अत्रचमातोपिपितृमहपार्वणेनिस
न्यानितुपार्वणेकोद्दिष्टानिकाम्यानि। गयायांतुमातृपार्वणमावश्यकमिति
वक्ष्यते। अत्रचतंत्रेणैवपाकः। बहूनामथवाद्वाभ्यांश्राद्धंचेत्स्यादिमेहनि। तं
त्रेणश्रपणंकृत्वापृथक्श्राद्धानिनिर्वपेदिति अत्रिस्मृतेः। अत्रचाशक्तौने
तीर्थे
कस्मिन्ब्राह्मणेसर्वाण्येकोद्दिष्टानिकार्याणि॥ अत्रतुविज्ञानेश्वरे। तीर्थे
षुचैवसर्वेषुमघासुचैकस्मिन्ब्राह्मणेसर्वानाचार्यादीन्प्रपूजयेत
दितिवदंति। पिंडदानंपृथगेव। देवंचसर्वपार्वणानांतंत्रमेव। कालभेदेनतं
त्रंस्याद्देशभेदेनचैवहि। तस्मात्तंत्रविधानानुयोगपद्यंप्रतीयतइतिसंग्रहका
रोक्तेः। यस्तुपरार्थंतीर्थयात्रांगच्छतितेनादौतत्पित्रादीनांश्राद्धंकार्यं। पश्चात्स्वी

न्मपर्यामि पिंडान्पृथक् पृथगिति वचनात्। यदा त्वेकोपि न लभ्येत तदा दर्भवटोरूप
रिश्राद्धं कार्यं। पात्राभावे त्विदं चापि तन्मध्ये विधिं नरः। निधाय वा दर्भवटोनास
नेषु समाहितः। प्रैषानुप्रैषसंयुक्तमिति। श्राद्धं संपन्नस्त संपन्नमिति प्रश्नप्रतिव
चने स्वयमेव वदेदित्यर्थः। आमहेमपक्षयोस्तु श्राद्धं निर्वर्त्य कालांतरे ब्राह्मणाय
न्नद्वयं दद्यात्। यस्तु श्राद्धे अशक्तः स पिंडदानमात्रं कुर्यात्। तथाह देवलः। पिंडैर
नअभावे द्रव्यविप्रयोरिति पिंडद्रव्याणि देवीपुराणे सक्तुभिः पिंडदानं च × मात्रंप्र×
संयावैः पायसेन वा। कर्तव्यमृषिभिः प्रोक्तं पिण्याकेनेंगुदेन वा। गुडेन वोतिपा
मंतरे। संयावो गोधूमविकारः पिण्याकस्तिलकल्कः इंगुदं तापसतरुफलं। अत्र
प्रेतदीपिकायां लाभे उत्तरोत्तरस्याहानित्याहुः। पिंडप्रदीमाणमाहानिकारः कपि
त्थबिल्वमात्रान्वा पिंडान्दद्याद्विधानतः कुक्कुटांडप्रमाणान्येकेषां चामल
कैः समान्। बदरेण समान्वापि दद्याच्छ्रद्धासमन्वितः। तीर्थश्राद्धे यपिंडानां अ
प्सु प्रक्षेप एव प्रतिपत्तिः। तीर्थश्राद्धे सदा पिंडान्क्षिपेत्तीर्थे समाहित इति वचना
त्। पिंडदानेप्यशक्तस्तु तिलतर्पणमात्रं कुर्यात्। तिलैः सप्ताष्टभिर्वापि समवेतं
जलांजलिमिति वचनात्। तदुक्तं संक्षेपे। शाकेन तर्पणं श्राद्धे पिंडदानानि त्रीण्य
विकार्याणि अशक्तेन तर्पणपिंडौ अशक्तेन तर्पणमिति कात्यायनः
नैमित्तिकानि कार्याणि निमित्तो
द्दे बहूनि निमित्तानि जायेरन्नेकवासरे। तथा चैकस्मिन्नपि दिने क्रमेणानेकतीर्थप्राप्तौ बहूनि श्रा
द्धानि कार्याणि। इत्युपरागश्राद्धवत्। यत्तु नैकश्राद्धद्वयं कुर्यात् समानेहनि
कुत्रचिदित्येतद्वचनं तत्समाननिमित्तकश्राद्धविषयं संक्रांत्यमावास्यानि
मित्तकश्राद्धानां तु देशादैक्येनागृह्यमाणविशेषाणां तंत्रानुष्ठानं यदि तु
तीर्थप्राप्तिदिने वार्षिकं स्यात्तदा पृथगेव कार्यं। तदुक्तं कालादर्शे। प्रत्याब्दिकेषु
देवल चालभ्ययोगेषु विहितस्य च। संपाते विहिता भेदाच्छ्राद्धयुग्मं समाचरेदिति। न
चाप्याद्ये तीर्थश्राद्धं पक्ष्वा हार्दिकमिति विवेकः। इदं च तीर्थश्राद्धं दर्शमासानंतरं
तीर्थश्राद्धावश्यकं अंतरानुकल्पेष्वप्यकृताकृतं संवत्सरे द्विमासोने इति प्रागु
दाहृतवचनेन च कारणात् तीर्थश्राद्धस्यापि संग्रहादिति दिक्। इति तीर्थश्राद्धविचा
रः। मैत्रायणीयपरिशिष्टे। महानदीषु सर्वासु तीर्थेषु च गयामृते। जीवत्पिता
पि कुर्वीत श्राद्धं पार्वणधर्मवत्। मृतमात्रस्य तु प्रासंगिकगयायात्रा सोऽप्रतिप्रसवः
श्रूयते। परिशिष्टे। अन्यकार्यगयायात्रां सत्यां यत्र क्षयतेहनि। मातुः श्राद्धं सुतः
कुर्यात्पितर्यपि च जीवति तौ प्रासंगिकगयायात्रासौ सत्यां कार्यं तूद्दिश्य गतत्वेत्यर्थः
॥ तत्र गयादितिरिक्ततीर्थेषु जीवत्पितृकेण वक्ष्यमाणसर्वोद्देशेन श्राद्धं कार्यं। ग
यायां तु यदि प्रसंगात्प्राप्ति मृतमातृकस्य तदा मातृपार्वणमात्रं कुर्यात्। अमृतमा
तृकस्तु नेच्छंति कालादर्शस्मृतिरत्नावलीकारादयः। अपरे तु जीवत्पि
तृकश्राद्धविधायकवचनानां साधारण्यात् गयायामपि जीवत्पितृकेण पितृ
पित्रादिभ्यो वक्ष्यमाणेभ्यः श्राद्धं कार्यं। एतस्मिन्पक्षे मृतमातृकस्य पितृपत्नी
त्वेन मातृश्राद्धसिद्धावपि आन्वष्टक्यमित्यादिवचनं मातृत्वादिरूपेण एव
तत्प्राप्त्यर्थं गयाश्राद्धनिषेधवचनानि तु मृतमातृकेणापि तद्घोद्दे

वृत्तिः तेन विकृतौ मातृ(ताम)माहादिश्राद्धे अर्थांतरवादूहः। सोपि प्रातिपदिकमात्र
स्येव बहुवचनं तु प्राकृतावेकस्मिन्नपि पितर्यपि समवेतार्थमिति नोह्यं। तत्रश्च
शुंधंतां पितरः शुंधंतां मातामहा इत्यादावूह्यं। एवं पितामह्यादावपि। शेषाणां
मंत्रवर्जितमिति विष्णुवचनस्यायमर्थः शेषाणामिति कर्तरि षष्ठी॥ तत्रश्च
वर्णशेषाणां शूद्राणां। तत्तुल्यानामनुपनीतानां स्त्रीणां च कर्तव्यं श्राद्धं तै
रमंत्रकं कार्यमित्यर्थः॥ वराहपुराणे अयमेव विधिः प्रोक्तः शूद्राणां मंत्रव
र्जितः अमंत्रस्य तु शूद्रस्य विप्रो मंत्रेण गृह्णत इति। अस्याश्च परिभाषात्वेन
प्रकरणानियम्यतया शूद्रस्य स्नानदानादावपि विप्रेण मंत्रः पठनीय इति
शूलपाणिः। अमंत्रकमिति वैदिकमंत्रस्यैव प्रतिषेधः। तीर्थश्राद्धे च वि
श्वेदेवौ धुरिलोचनौ यदा काम्यप्रयोगः नित्यप्रयोगे तु पुरूरवार्द्रवौ वा॥ इ
ति तीर्थश्राद्धे विहितनिषिद्धविचारः॥ ॥अथामहेमश्राद्धविचारः
सुमंतुः। तीर्थश्राद्धं प्रकुर्वीत पक्वान्नेन विशेषतः। आमेनान्नेन हिरण्येन कंदमू
लफलैरपीति। अत्रान्नश्राद्धं (मुख्यं) उत्तरोत्तरं चानुकल्प इति मदनपारिजातदिवो
दासादयः। स्मृतिरत्नावलीकारादयस्तु यत्तीर्थश्राद्धे चामश्राद्धं हेमश्राद्धं
वा मुख्यं सदैव द्विजन्नां तेषामश्राद्धं प्रचक्षत इति वचनात्। पाकश्राद्धं न भवत्ये
वेत्याहुः। अन्ये तु तीर्थजलकसमीपे चेद्ग्रामे न हेम्ना वा जलांते भिक्षुकैः शृंखलत्वे
नैव पक्वान्नेन विशेषत इति वचनात्। कृष्णलामेनैव सदा कार्यं सदात्वेव तु
शूद्राणामामश्राद्धं विदुर्बुधा इति स्मृतेः। आमश्राद्धे च विशेषः स्मृतौ
आमं दद्याच्चेद्द्वा अन्नं नामद्विगुणं भवेत्। त्रिगुणं (चतुर्गुणं) चापि तत्त्वेके उपामर्षयेत
अन्नात्पुरुषाहारादित्यर्थः। अत्रोत्तरोत्तरपक्षो मुख्यः। हिरण्यं तु चतुर्गुणं च
तुर्गुणं द्विगुणं वा अशक्तौ तु सममपि आमं हेम वा देयं। उशनाः आमश्राद्धं य
दा कुर्याद्विधिवत् श्राद्धदस्तथा हस्तेग्नौकरणं कुर्याद्ब्राह्मणस्य विधानतः। तथा
दद्याद्धस्ते द्विजातिभ्यः शृतं वाशृतमेव वा। तेनाग्नौकरणं कुर्यात्पिंडांस्तेनैव नि
र्वपेत्। षड्विंशन्मते आमश्राद्धं यदा कुर्यात्पिंडदानं कथं भवेत्। गृहपाकात्समु
द्धृत्य सक्तुभिः पायसेन वा। पिंडदानं प्रवर्तीति शेषः। आमगृहपाकसक्तु
पायसानां विकल्पः। आमश्राद्धे च भोजनसंबंधापोशानादयो नु न प्रयोज
नानिवर्तंते। कुशलेव चातवत्। तदुक्तं। तन्निप्रश्नावधौ हस्तजपप्रश्नोपयथासुखं
आमश्राद्धेस्तवन्नेतरपोशानं च पंचमं। अवगाहोंगुष्ठनिवेशनं। हेमश्राद्धे पिंड
निवृत्तिरिति दिवोदासः। मत्स्यार्थसारे तु विकल्पः। आमश्राद्धे केषांचिन्मंत्राणा
मूहोपि भवति। तथा च मरीचिः। आवाहने स्वधाकारे मंत्राऊह्या विसर्जने। अन्य
कर्मणि वोह्यास्तु रामश्राद्धविधिस्मृतेः। आवाहने पितृन्हविषे अत्तव इति मंत्रे
ऽन्नव इति पदस्थाने स्वीकर्तव्य इति पदोहः। स्वधाकारे नमो वः पितर इष इति मंत्रे इ
ष इति पदे आमायेति पदोहः। विसर्जने वाजेवाजेवत इति मंत्रे त्वसाप्याते स्पत्र तृप्ता इ
ति कअस्यस्थाने नव्यातेति पदोहः। यद्यपि प्रत्यतिवा एतद्द्वचोक्षरं पदेन दृष्टहति
इतिरूप्यूहो निषिद्धस्तथापि वचनादूहः। यदा ब्राह्मणा बहवो न लभ्यंते तदेके
नापि श्राद्धं कार्यं। अन्नाभावे द्विजाभावे तीर्थरूपे महालये एकस्मिन्दीयते चा

ध्योनविद्यते॥ ॥ इतिनदीरजोदोषविचारः॥ ॥ अथतीर्थश्राद्धं ब्रह्मपु
राणे परकीयगृहेयस्तु स्नानपितॄंस्तर्पयेऽल्पकः। तद्भूमिस्वामिपितरस्तस्यहरंति
पितरोबलात् अयभागंततस्तेभ्योदद्याच्छ्राद्धं मूल्यंचजीवितां। अत्रपरगृहाद
योनिषिद्धः ननुतीर्थादयः तेषामस्वामिकत्वात् तदुक्तंकौर्मे वना
निगिरयोनद्यस्तीर्थान्यायतनानिच देवखातश्चगर्ताश्चनस्वामीतेषुविद्यते
।गर्ताअत्रच्छिमाक्षेनविशेषः अत्रयोन्याद्यः भारते मुक्तोवाप्यथवामुक्तो
राजाबहुनिरदेचर नकालनियमोह्यस्ति गंगांप्राप्यसरिद्वरामिति तीर्थेकाले
विशेषोमात्स्येउक्तः सर्वकालेथवाकालेश्चतीर्थेप्राप्यवाशुचिरिति अशुचिरा
शौचेनयुक्तोपि तथाचपैठीनसिः विवाहदुर्गयज्ञेषुयात्रायांतीर्थकर्मणि
नवर्जयेत्तकंतद्वत्कर्मयज्ञादिकारयेन्नहति श्राद्धंच आमहेमश्राद्धविषयं अ
नन्नश्राद्धंतु रात्रिसंध्ययोर्भक्तवतश्चतीर्थप्राप्तौ द्वितीयदिने आशौचेतुतीर्थ
प्राप्तौवाशौचापगमे मलमासेतीर्थप्राप्तौतदाश्राद्धंकृत्वाशुद्धमासेपुनःकार्यं
।योगादिकंमासिकंचश्राद्धंचापरपक्षिकं मन्वादिकंतैर्थिकंच कुर्यान्मासद्व
येपिचेतिस्मृतिचंद्रिकायांलिखितवचनात् अत्रापरपक्षिकंप्रतिमासं
कृष्णपक्षश्राद्धं नतुमहालयश्राद्धं तस्यतत्रनिषेधात् स्कांदे नपरीक्ष्यो
द्विजस्तीर्थेह्यन्नार्थीभोज्यएवतु एतच्चश्राद्धार्हब्राह्मणालाभेवेदितव्यं तत्रा
पिगुणैर्नपरीक्षेत पातित्यादयस्तदोषास्तुपरिहर्तव्याएवेतिस्मृतिरत्ना
वलीकारः॥ अथतीर्थश्राद्धेनिषिद्धानिदेवीपुराणे श्राद्धंचतत्रकर्तव्यम
र्घ्यावाहनवर्जितमिति तथा अर्घ्यमावाहनंचैवद्विजांगुष्ठनिवेशनं तृप्तिप्रश्नंच
विकिरंतीर्थश्राद्धेविवर्जयेत् तथा नावाहनंनदिग्बंधोनदोषोदृष्टिसंभवः स
कारुण्यंचकर्तव्यंतीर्थश्राद्धंविचक्षणैः भविष्ये आवाहनंविसर्जनं श्वतत्रतेषां
नविद्यतइति अग्नौकरणमपितीर्थश्राद्धेनकार्यमितिस्मृतिरत्नावल्यां॥ अयं
चार्घ्यादिनिषेधस्तीर्थप्राप्तिनिमित्तकश्राद्धे। ननुतदधिकरणकश्राद्धमात्रे
सुवासिनी तथा अयनद्वितीयेश्राद्धंविषुवद्वितयेतथा संक्रांतिषुचकर्तव्यं
पिंडनिर्वपणादृतइतिसंक्रांत्यादिनिमित्तकएवपिंडनिषेधोनतुवार्षिकेतद्वत्॥
तदुक्तं नचैवान्यनिमित्तकेपितृयज्ञेपिंडप्रवाहणंस्यादितितिविष्णुः मातामहानां
मध्येवंश्राद्धंकुर्याद्विचक्षणः। मंत्रोहेनयथान्यायंशेषाणांमंत्रवर्जितमिति क्र
द्धेहन्यायश्चपदैरुक्तः मुख्यदशार्थेतास्वार्थसमवेतापदादिभिः॥ अयुक्ताः
प्रकृतौमंत्रागताः कार्यातिदेशतः। विकारेष्वनिबद्धोहः कार्यःपंचमेपुपंचधा।
अर्थांतरेषुपूर्वार्थद्वारेणोहंप्रजंतिनइतिपंचधाकार्यापत्तिस्तु॥ तस्यदर्शविधा
नाप्तावेवविधानेनविकारतः॥स्वचराद्वाद्वित्वौषधानुवादात्तत्कार्यकारितेति॥
एवंचपितृन्हविषइत्यत्रपित्राद्यस्यसमवेतार्थवादर्थान्तरेप्रयोगाभावान्नोहः॥ पि
तराश्चोहितार्थः अनकपार्थीसपिंडीकरणांतःश्राद्धजनितपितृभावोपाधिनास्त्री
पुंससाधारणः प्रेतोपित्वमापन्नोसपिंडीकरणादनु इतिविष्णुस्मृतेः॥शुंधंतांपि
तरइत्यत्रअन्यायादूहः अत्राहिपर्यन्तोपाधिनापितृपदप्रवृत्तौशुंधंतांपितामहाः
शुंधंतांप्रपितामहाइतिमंत्रद्वयपाठोनर्थकःस्यात्। अतोजनकत्वोपाधिनैवप्र

तयेयस्तुभ्रमत्यनशनोबुधिः। तस्यत्रिरात्रमाशौचंस्मृतिं
येत्वस्थिसंचयः। तृतीयेनस्वर्कंदचातुर्थेन्हिद्धमाचरेदिति।
श्राद्धमेकादशाहिकं। पुत्रस्यापित्र्यहमेव। अविशेषादितिदिवो
दासीये॥ इदानींतुसपिंडाद्याःसर्वेपिदशाहादेवाचरंति॥ ॥
यमुनायास्नानविशेषः॥ ॥आदित्यदुहितर्देविपमज्येष्ठयश
स्विनि॥ त्रैलोक्यवंदितेपुण्येपापमेयमुनेहर॥ इत्युक्त्वाचनिमज्जाचोऽन्मज्या
चम्यप्राकृत।। तर्पयेद्यमंवाभिर्नामभिमात्रजलैस्तिलैः॥ यमायधर्मराजायमृ
त्यवेचांतकायच। वैवस्वतायकालायसर्वभूतक्षयायच। औदुंबरायदध्नायनी
लायपरमेष्ठिने। वृकोदरायचित्रायचित्रगुप्तायवैनमः। देवतर्पणवद्यासौचतुर्द
शाजलांजलीनितिपाद्मे॥ ॥इतिप्रयागप्रकरणं॥ ॥अथकाशीप्रकरणं लैंगे
॥ ॥जन्मांतरसहस्रेणयत्पापंपूर्वसंचितं॥ अविमुक्तंप्रविष्टस्यतत्सर्वंव्रजतिक्षय
मिति। तथा मेरुमंदरमात्रोपिराशिःपापस्यकर्मणः॥ अविमुक्तंसमासाद्यतत्क्ष
णाद्व्रजतिक्षयमिति। अत्रप्रारब्धव्यतिरिक्तसकलकर्मक्षयोबोध्यः। अत्रकाशी
प्रवेशादेवसकलं तज्जन्मार्जितमेवपापंनश्यति। तत्तीर्थस्नानादिनातुप्रागर्जितस
पापक्षयइतिकेचित्। अन्येतुप्रवेशादखिलजन्मपापक्षयः। स्नानादिनातुतद्वास
नानिवृत्तिरित्याहुः। अपरेतुप्रवेशाद्दोषमेवपापंनश्यति। तत्तीर्थस्नाना
दिनातुकाश्यामुत्पन्नानांपापानांनिवृत्तिः। नचतेषामपिलिंगशरीरस्यकाशी
प्रवेशात्सकलपापनिवृत्तिर्जायतइतिवाच्यं। षष्ठेतिर्यगधिकरणन्यायेन। यतो
विधिनिषेधेषुमनुष्याणामधिक्रिया। अतःपशुपिशाचाद्याधर्माधर्मेश्वरा
मताइतिपद्मपुराणात्मनुष्याधिकारिकचाकाशस्यलिंगशरीरेपापनाशासं
भवात्। अतस्तीर्थस्नानोदकद्वारादिजन्मीयपापनाशवचनानिकाश्युत्पन्नविषया
णि। अन्येतुगमनादौप्रत्येकंसर्वपापनाशेपिप्रवेशाद्यज्जातीयंसर्वपापंनष्टं। त
द्विजातीयमेवस्नानादिनानश्यतीत्याहुः। काशीखंडे पंचाशेध्यायेज्येष्ठशु
क्लप्रतिपदादशम्यवधिदशाश्वमेधस्नानाद्युक्तं। ज्येष्ठेमासिसितेपक्षेप्राप्यप्र
तिपदंतिथि। दशाश्वमेधिकेस्नातोमुच्यतेजन्मपातकैः। ज्येष्ठशुक्लद्वितीयायांस्ना
त्वारुद्रसरोवरे। जन्मद्वयकृतंपापंतत्क्षणादेवनश्यति॥ एवंसर्वासुतिथिषुक्रमस्ना
यीनरोत्तमः। आशुक्लपक्षदशमीप्रतिजन्माघमुत्सृजेत्। तिथिंदशाहरांप्राप्य द
शजन्माघहारिणीं। दशाश्वमेधिकेस्नातोयामीपश्येन्नयातनां॥ लिं
गंदशाश्वमेधेशंदृष्ट्वादशहरातिथौ॥ दशजन्मार्जितैःपापैस्त्यज्यतेनात्रसं
शयः॥ स्नातोदशहरायांयःपूजयेल्लिंगमुत्तमं। भक्त्यादशाश्वमेधेशानतंगर्भेद
शास्पृशेत्॥ ज्येष्ठेमासिसितेपक्षेस्नात्वारुद्रसरेनरः॥ कुर्वन्नैवार्षिकींयात्रांन
विघ्नैरभिभूयते। दशाश्वमेधावभृथेयत्फलंसम्यगाप्यते। दशाश्वमेधेतन्नूनंस्ना
त्वादशहरातिथौ। स्वर्धुन्याःपश्चिमेतीरेनत्वादशहरेश्वरं। नदुर्दशामवाप्नोति
पुमान्पुण्यतमःक्वचित्॥ ॥इतिकाशीप्रकरणं॥ ॥अथगयाप्रकरणं॥ ॥ त
त्रगयाश्राद्धेअधिकारिणःप्रपद्यकादेवज्ञेयाः॥ विशेषस्तु। पुत्रेषुपविद्यमानेषु
नान्यंवैकारयेत्स्वधामितिविश्यापवादः॥ आत्मजोऽन्यजोवापिगयाकूपेयदातदा॥
यन्नाम्नापातयेत्पिंडंतंनयेद्ब्रह्मशाश्वतं। संन्यासिनातुश्राद्धस्थलेषुदंडस्पर्शनमात्रं
कार्यं। ननुश्राद्धतर्पणादि॥ तदुक्तंवायवीये॥ दंडंप्रदर्शयेद्भिक्षुर्गयांगत्वानपिं
डदः॥ दंडंस्पृष्ट्वाविष्णुपदेपितृभिःसहमुच्यते॥ स्पृष्ट्वेयंतत्कीर्तितण्यर्थं॥ स्पर्शयि
त्वेत्यर्थः॥ तथा। गयायांमुंडपृष्ठेचकूपेयूपेवटेतथा॥ दंडंप्रदर्शयेद्भिक्षुःपितृभिः
सहमुच्यते॥ ॥अथगयाश्राद्धेकेचिद्विशेषाहेमाद्रौ॥ महालयेगयाश्राद्धे
प्रेतश्राद्धेदशाहिके॥ पिंडशब्दप्रयोगःस्यादन्नमन्यत्रकीर्तयेत्॥ अयंपिंडस्व

आमहं करिष्ये इति सामान्यतो वा प्रयागे। द्विपात्राः करिष्य इति विशे
षतो वा युगपत्संकल्पो न घटते। एकप्रयोगविधेरभावात्। किंच नि
नमेव तीर्थमुद्दिश्य संकल्पः कार्यः। आंतरालिकं तु संदेशिकं संगिकं
अतो धर्मे तीर्थफलं तस्येति वचनात्। यात्रामात्रार्थमेव फलं स्नान
श्राद्धादेरेव पूर्णं दृष्टा। दाक्षिणात्येन तीर्थप्रयागयात्रैव तन्मात्रसंकल्पपूर्व
कं कार्या। ततः प्रयागे कार्या यात्रा संकल्पः। काश्यां गयायाः। तत्र च तत्तया
त्फलं पूर्णं भिन्नत्वेन किंतु दूरस्थसमीपस्थकर्तृकयात्रया नियोजनतारत
म्येन प्रयाससतारतम्ये फलतारतम्यं बोध्यं॥ ॥अथ मुंडनविचारः॥ ॥तत्र
विधवानां साधारणविधावेव मुंडनमुक्तं। सधवानां तु विशेषः। विद्वद्द्विज
विधवानां साधारणविधावेव मुंडनमुक्तं सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयं।
नृपस्त्रीणां न च्छेत केशवापनं। सर्वान्केशान्समुद्धृत्य छेदयेदंगुलद्वयं।
तीर्थादिषु सभर्तृणां स्यादेवं केशवापनमिति वचनात्। प्रयागे सभर्तृकाणां
तीर्थादिषु सभर्तृणां स्यादेवं केशवापनमिति दिवोदासीये। अन्ये तु स
र्वकेशान्समुच्चयस्य द्व्यंगुलं छेदमात्रं कार्यमिति दिवोदासीये। अन्ये तु स
मूलमेव वपनमाहुः। तत्रापि केचित्तु मुंडनं चोपवासश्च सामान्यवचनं। तीर्थप्रा
मूलमेव वपनमाहुः। तत्रापि केचित्तु मुंडनं चोपवासश्च सामान्यवचनं। तीर्थप्रा
नरे तु शिष्टाचाराभावान्न कार्यमिति वदंति। इदं च प्रयागमुंडनं योजनत्रया
धिकदेशागतेन कार्यं। तन्न्यूनदेशागतेन। ऊर्ध्वमब्दाद्द्विमासानामदातीर्थं
प्रदेशान्मुंडनं। तदा तद्वपनं शास्त्रं प्रायश्चित्तं च तेद्विजः। प्रयागे प्रतियात्रं तु योजन
त्रयादूर्ध्वं। यत्तु। नैकसंवत्सरे कुर्यात्प्रयागे वपनद्वयमिति तद्योजनत्रयांत
र्गतपरं। ॥इति मुंडनं॥ ॥अथ माघस्नानारंभकालः॥ ॥विष्णुः
वीसिविषयं॥ ॥इति मुंडनं॥ ॥अथ माघस्नानारंभकालः॥ ॥आद्य
सौरमासमभिप्रेत्याह। तुलामकरमेषेषु प्रातःस्नायी सदा भवेदिति। आद्य
तु सावनं॥ एकादश्यां शुक्लपक्षे पौषमासे समारभेत्। द्वादश्यां पौर्णमास्यां
वा शुक्लपक्षे समापनं। विष्णुः। इत्थं विपौर्णिमा
सीवान्तरे चाश्वस्नानमाचरेत्॥ पुण्यान्यहानि त्रिंशत्तु मकरस्थे दिवाकरे तु ति
अत्रैकादश्यां पौर्णमास्यां आरंभे यदा माघस्याधिकमासता भवेदिति तदा
काम्यानां तत्र समाप्तिप्रतिषेधान्मासद्वयं स्नानं तन्नियमाश्चानुवर्तंते। सौ
रपक्षे तु न कदाचिदनुपपत्तिः॥ अत्र च माघमासमिमं पूर्णं स्नास्येऽहं देव
माधव। तीर्थस्यास्य जले नित्यमिति संकल्प्य चेतसि इति विष्णुवचनेन अस्य
तीर्थस्येति मंत्रलिंगात् यत्र तीर्थे स्नानारंभस्तत्र समाप्यं नेतरत्र॥ एकप्रयोगा
नामेकदेशत्वस्यैकादशो साध्यसाधनात्॥ प्रसह्य संकल्प्य मंत्रैश्च पापघ्नौ म
करस्थे रवौ माघे गोविंदाच्युत माधव। स्नानेनानेन मे देव यथोक्तफलदो भव॥
॥इत्युक्तो पि दुराचारो ब्रह्महत्यादि
ति॥ ॥अथ प्रयागे मरणविचारः॥ ॥इति नानापुराणवचनश्र
पातकी। हरिं ध्यात्वा त्यजेद्देहं प्रयागे मुक्तिमाप्नुयादिति नानापुराणवचनश्र
वणेः प्रयागे मरणं नानाफलार्थत्वेन मोक्षार्थ
त्वेन च विधीयते। मोक्षार्थत्वेऽपि तीरे च सितासितयोरादिका। अत्र केचित्
प्रयागमरणं न सर्वसाधारणं। शूद्रादीनां च विचारः। ब्राह्मणस्य तु ब्रह्मनराधमः।
एते त्यजेयुः प्राणान्वै ब्राह्मणः पतितो द्विजः। पतितो ब्राह्मणस्तत्र ब्रह्महा चात्मघा
भवेदिति ब्राह्मणस्य निषिद्धत्वादित्याहुः। तन्न केवलपस्य निर्मूलत्वादुपस्य
अत्र च प्रायश्चित्तं सर्वप्रायश्चित्तं कृत्वा स्त्रीयश्राद्धाधिकार्यभावे जीवच्छ्राद्ध
च पिंडांतं निर्वर्त्य कृतोपवासः परेऽह्नि फलोद्देशपूर्वकं संकल्प्य विष्णुं ध्यायन्
जलप्रवेशादि कुर्यादिति संक्षेपः। एवं च मरणानां त्रिरात्रमेवाशौचं सर्वेषां
साधारणं न तु दशरात्रादि। तदुक्तं। आशौचं स्यात्त्र्यहं तेषामिति॥ आत्मानं घा

पितामहस्तथैव च प्रपितामहः॥ मातामहस्तत्पिता च प्रमातामहतादयः। तेषां
पिंडो मया दत्तो ह्यक्षय्यमुपतिष्ठतामिति मंत्रेणैकं पिंडं दद्यादिति॥ इति तीर्थश्रा
द्धविचारः॥ ॥अथ तीर्थे अस्थिप्रक्षेपविधिः॥ ॥गंगातोयेषु यस्यास्थि
क्षिप्यते शुभकर्मणा। न तस्य पुनरावृत्तिर्ब्रह्मलोकात्सनातनात्। तत्र काल
विशेषः। अस्तंगते गुरौ शुक्रे तथा मासे मलिम्लुचे। गंगायामस्थिनिक्षेपान्
कुर्यादिति गौतमः। तथा। अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकं। प्रथमे
ऽब्दे न कुर्वीत यदि स्यात्सपिंडनं। कृते पितुः सपिंडने मिति
पाठांतरं। तथा। अस्थिक्षेपं गयाश्राद्धं श्राद्धं चापरपाक्षिकं। प्रथमेऽब्दे विकुर्वी
त यदि स्यात्कृतमात्रकं इति पाठांतरं। दशाहाभ्यंतरे तु नदी
न कृतयस्योद्धृत्य हि कं। यदि स्याद्दक्षिमाकृतः इति पाठांतरं। गयायां मरणं यादृक् तादृक्
षः। दशाहाभ्यंतरे यस्य गंगातोये स्थि मज्जति। गयायां मरणं यादृक् तादृक्
फलमवाप्नुयादिति वचनात्। पुराणे। मातुः कुले पितुः कुले वर्जयित्वा नराधमः।
फलमवाप्नुयादिति वचनात्। पुराणे। दद्याच्च द्रव्यादिलोभविषयिकं।
अस्थीन्यन्यकुलोत्थानि नीत्वा चांद्रायणं चरेत्। इदं च द्रव्यादिलोभविषयिकं।
अस्थीन्यन्यकुलोत्थानि नीत्वा चांद्रायणं चरेत्॥ ॥अथ प्रकीर्णको धर्मः॥ ॥एकां चांद्रा
यणादिना वपने फलश्रवणात्॥ शिवस्याग्रे प्रदक्षिणा॥
रवेः सप्त तिस्रः कुर्याद्विनायके। चतस्रो विष्णवे कार्या शिवस्यार्धप्रदक्षिणा॥
शिवं प्रदक्षिणं कुर्वन्सोमसूत्रं न लंघयेत्। सोमसूत्राप्रमाणं विश्वेश्वरादौ दोषा
भावं च कात्रीप्रकरणे वक्ष्यामः। नमस्कारे तु विशेषः। अग्रे पृष्ठे वामभागे समी
पे मंदिरेऽपि च। जपहोमनमस्कारान्न कुर्यात् केवले ऽतो यो। अग्रे मृत्युमवाप्नोति
भवेत्पश्चात्। वामभागे भवेन्नाशो दक्षिणे सर्वकामदः। शिवस्य लयोऽपि
कार्यः। पशोः पशुपतेरग्रे दंडवत्पतितो भुवि। पतंति पातकाः सर्वे नोत्तिष्ठंति तदा
सहेति वचनात्। पाद्मे। उच्यमानं फलं तोयं शिवस्य च न स्पृशेत् क्वचित्। लंघये
न्नैव निर्माल्यं कूपे सर्वं विनिक्षिपेत्। आह्नेतु। ब्रह्मांगलं तु विप्रेभ्यो वै लवं च प्र
दापयेत्। रुद्रांगलं ममद्योत्तदहं सर्वं च तत्क्षणात्। अन्येभ्यस्त्वथ देवेभ्यो यन्नवं
द्दीनेषु निर्दक्षिपेत्। विप्रेभ्यस्त्वथ दत्तं यन्मानभ्यो यन्निवेदितं। आह्नणेभ्यस्तु तद्द
यं गणेशादिनिवेदितं। विश्वेश्वरादौ त्वपवादं वक्ष्यामः। महादानानि ये विप्राग्र
कृता स्नानदुर्बलाः। वृक्षाश्च द्विजरूपेण जायंते ब्रह्मराक्षसाः। अथ चैव
निरूह्य। यादृशोऽहमो निर्गतिकोऽपि। दत्तं ग्रामं जितं दद्यादेवं धर्मो निहीयते। दे
[illegible] वके। न नदीषु नदीं ब्रूयात्पर्वतं तु च पर्वते। स्कांदे। स्नानकाले न्यतीर्थेषु जा
ष्वंतां जाह्नवीं जने। यदा मार्गगामिनो वरासरस्वती व्यतिरिक्ता नदी आपतेत् तत्
दापरपारस्नानादिकं कार्यं। सरस्वत्यास्त्वर्वाक्तीरे। तदुक्तं। मार्गे तरा नदी प्राप्तो
स्नानादि परपारतः। अर्वाग्विव सरस्वत्या एष मार्गगतो विधिः। यत्र त्वर्वाक्तीरे
वा तीर्थविशेषः। सरस्वत्याः परपारे वा तीर्थविशेषस्तत्रोक्तनियमानादरेणावि
शिष्टतीर्थ इव सर्वं कार्यं। नारदीये। यः शूद्रेणार्चितं लिंगं विष्णुं वा प्रणमेन्नरः।
न तस्य निष्कृतिर्दृष्टा प्रायश्चित्तशतैरपि इति। योषिद्भिः पूजितं लिंगं इत्यादि
तु पुरा सिद्धविषयं। तथा।
अन्यत्र। इदं चेदानीं नूतनप्रतिष्ठापितविषयं। न तु पुरासिद्धविषयं। तथा।
शूद्रो वानुपनीतो वा स्त्रियो वा पतितोऽपि वा। केशवं वा शिवं वापि स्पृष्ट्वा नरकम
श्नुते। तथा। वपनं मैथुनं तीर्थे वर्जयेद्गर्भिणीपतिः। श्राद्धं च सप्तमान्मासा
दूर्ध्वं चान्यत्र वेदवित्। श्राद्धं श्राद्धभोजनं न देवः पर्वताग्रेषु नदेवो विष्णुसन्न
नि। देवश्री सदानंदमयो भक्तिदर्शने न लभ्यते॥ ॥इति साधारणतीर्थवि
धिः॥ ॥अथ प्रयागप्रकरणं॥ ॥अथ च॥ इह च त्रिस्थलीया

हेमाद्रौ।
यानामिति प्रपंचितं। विधवा तु भर्तृपार्वणं स्वपितृपार्वणं च कुर्यात्। स्वम
तृप्रभृतिभ्यः स्वपितृभ्यस्तथैव च। विधवाकाम्ये श्राद्धं यथाकालमतं
द्रितमिति स्मृतिदर्पणे लिखितस्मृतेः। यस्याः श्वशुरो जीवति सा भर्तृतत्
पितामहप्रपितामहेभ्यः स्वापितरि जीवति तु द्वारलोपान्नत्पार्वणलोप एव।
मातृत्रयश्राद्धे स्वश्राद्धादिपार्वणं कृत्वा कुर्यादिति। एवं च वदैवतं। केचित्तु मात्रा
दिपार्वणेन सह द्वादशदैवतमित्याहुः। अपरे तु स्वमातामहपार्वणेन पंचद
शदैवतं· अन्ये तु स्वमातामह्यादिपार्वणेन सहाष्टादशदैवतं· एवं त्रय
मप्यपुत्रविषयमिति केचित्· जीवत्पितृके तु विशेषः। वृद्धौ तीर्थे च सन्यस्ते
ताते च पतिते सति। येभ्य एव पिता दद्यात्तेभ्यो दद्यात्स्वयं सुत इति। विष्णुना च
न्योऽपि विशेष उक्तः। पितरि जीवति पिता येषां दद्यात्तेषां कुर्यात्। पितरि पि
तामहे च जीवति येषां पितामहः। पितरि पितामहे प्रपितामहे च जीवति नैव कु
र्यादिति· तस्मात्पितुरेव पित्रादयो मात्रादयो मातामहादयश्च जीवत्पितृक
स्य तीर्थश्राद्धे देवताः एवं स्वमातुः पितृपत्नीत्वेनैकोद्दिष्टं· मातामहस्य च स्व
पितृश्वशुरत्वेन· स च यदि द्रव्याद्दीनत्वेन प्रेरितः पुमंतरवत्· पितृनिर्मुक्त
सम्यक्कार्थमेव यानियदा तदा यजमानस्य पितृपितामहप्रपितामहानामि
त्येवमाकारवाक्यरचनया एकं श्राद्धं कृत्वा स्वस्यापि श्राद्धहेतुप्रासंगिकं
तीर्थप्राप्तेः· इत्र वा पितुः पित्रादीनामित्येवंविधवाक्यरचनया श्राद्धांतरं
कुर्यात्। न तु प्रसंगे तंत्रेण वा। भिन्नाधिकारिकत्वात्। यदा मृतमातृकः
पितुर्थगयायां याति तदा प्रथमश्राद्धं यजमानपत्नीत्वेन स्वमात्रैकोद्दिष्टं· द्विती
येतु पितृपत्नीत्वेनैकोद्दिष्टमेव· ततो मात्रादिपार्वणं· कालात्तत्रादिमते
तु गयायां जीवत्पितृकस्य श्राद्धेऽनधिकारात्पितृपत्नीत्वेन श्राद्धं नास्त्ये
व· गयातिरिक्ततीर्थेषु तु पितृपत्नीत्वेनैकोद्दिष्टमेव· न तु पार्वणं वचनाभा
वात्। यत्तु जीवेत्पित्रे वर्गौ यत्तद्धर्मं तु परित्यजेत् इति तदमावास्यादिवि
षयं· एवं च श्राद्धं पिंडांश्च कृत्वा सामान्यपिंडोऽपि देयः। यदाह देवलः। ए
कपिंडमुपादाय संस्कृत्य च यथाविधि। ज्ञातिवर्गस्य कर्तव्यः सामान्य
मिति निर्वपेत्। इति वक्ष्यमाणमंत्रेण। मंत्रस्तु। पितृवंशे मृता ये च
मातृवंशे तथैव च· गुरुश्वशुरबंधूनां ये चान्ये बांधवाः स्मृताः। ये मे कु
ले लुप्तपिंडाः पुत्रदारविवर्जिताः। क्रियालोपहताश्चैव जात्यंधाः पंग
वस्तथा। विरूपा आमगर्भाश्च ज्ञाताज्ञाताः कुले मम। धर्मपिंडो मया द तेषां
त्तोऽस्याक्षय्यमुपतिष्ठतामिति· अत्र श्लोकत्रयस्यापि एकमंत्रता। तावे
तैव वाक्यार्थपरिसमाप्तेः। तथा· आब्रह्मणो ये पितृवंशजाता मातुस्तथा
वंशभवा मदीयाः। वंशद्वयेऽस्मिन्मम दासभृत्या भृत्यास्तथैवाश्रितसेवकाश्च।
मित्राणि सख्यः पशवश्च वृक्षा दृष्टाश्चादृष्टाश्च कृतोपकाराः। जन्मांतरं
ये मम संगताश्च तेभ्यः स्वधा पिंडमहं ददामि· इति श्लोकाभ्यां पिंडोऽयं देयः·
अत्रापि पूर्ववदेकमंत्रता। यस्य त्वेतावत् श्राद्धकलापं प्रत्येकं च पिंडदानं
रोगादिना कर्तुमशक्तिर्व्याध्यादिना वा तस्य कालस्याभावो वा संक्षेपश्रा
द्धं कुर्यात्· तद्यथा· अशक्त्या संक्षेपश्राद्धं करिष्ये इति संकल्प्य· ॐ पिता

धानमकृत्वा प्रागादिनिगमेषु पिंडदानं तु प्रयोगः। तथा· वृद्धिश्राद्धे गयाश्राद्धे प्रीतिश्राद्धे
तथैव च। सपिंडीकरणश्राद्धे न जपेत्पितृसूक्तमित्यभिश्रवणनिषेधः॥ अथ म
ध्ये गयाश्राद्धकरणे वृद्धिश्राद्धकरणे वृद्धिप्राप्तावपि मासिकान्यपकृष्य कृत्वा गया
श्राद्धं कुर्यादिति केचित्। तत्र मूलं मृग्यं। महापातकिविषये तु विशेषो ब्रह्मपुरा
णे॥ क्रियते पतितानां च गते संवत्सरे क्वचित्। देशधर्मप्रमाणत्वाद्गयाकूपे स्वबं
धुभिः॥ संग्रहे। महालये गयाश्राद्धे मातापित्रोर्मृतेऽहनि। कृतोद्वाहोऽपि कुर्वीत पिंड
निर्वपणं सुतः। गयाश्राद्धं नित्यं गयायां पिंडदानेन पितृभ्यामनृणो भवेदिति श्रुत्या
दिवचनैः। ब्राह्मणस्य सोमविद्याप्रजमृणवाक्येन संयोगादिति न्यायाच्च। अत
एव कौर्मे। गयाभिगमनं कर्तुं यः शक्तोऽपि न गच्छति। शोचंति पितरस्तस्य वृथा चा
स्य परिश्रम इति। तस्मादयाकसंपुत्रस्य॥ अतो यथाशक्त्यप्यनुष्ठेयं। तत्रा
पि सकृत्करणमेव नित्यं। तावतैव शास्त्रार्थसिद्धेः। आवृत्तिबोधकवीप्सा यथा
वाक्ये। चातुर्मास्यवत्॥ पुनः करणे तु फलमधिकं तदेव। तस्मादमुक्तेर्ध्विचा
दौ नरकोद्धारादि इति केचित् पर्यायार्थं फलं॥ काशीमरणादिना मुक्ते तु
तस्मिन्कृते गतः प्रत्ययाभाव एव फलं भवतीति
सिद्धं॥ ॥ इति गयाप्रकरणं॥ ॥ इति महोजिदीक्षितकृतत्रिस्थलीसेतु
सारसंग्रहः॥ ॥ प्रघट्टके शंखलिखितौ· प्रतिग्रहादुपावृत्तः संतुष्टो येन
केनचित्। अहंकारविमुक्तश्च स तीर्थफलमश्नुते॥ अनेन तीर्थयात्रां गत्वेन प्रति
ग्रहो निषिध्यते। पाद्मे॥ न तीर्थे प्रतिगृह्णीयात्प्राणैः कंठगतैरपि॥ अपि का
मातुरेतं तु रक्षति मातरं। तीर्थे प्रतिग्रहो यस्य तीर्थविक्रय एव सः॥ विक्री=
तायां तु गंगायां विक्रीतः स्याज्जनार्दनः॥ जनार्दने तु विक्रीते विक्रीतं भुवनत्र
यं॥ यस्करोत्याद्धनः क्षेत्रे प्रतिग्रहरुचिर्भवेत्॥ नैव तस्य परो लोको
नायं लोको दुरात्मनः॥ ब्रह्मपुराणे॥ प्रवाहमवधिं कृत्वा यावद्धस्तचतुष्टयं।
तत्र नारायणः स्वामी नान्यः स्वामी कदाचन॥ तत्र न प्रतिगृह्णीयात्प्राणैः कंठग
तैरपि। दानधर्मे च॥ भाद्रशुक्लचतुर्दश्यां यावदाक्रमते जलं। तावद्गर्भं विजा
नीयात्तदूर्ध्वं तीरमुच्यते॥ ब्राह्मे॥ सार्धहस्तशतं यावद्गर्भतस्तीरमुच्यते। स्कांदे
तीराद्गव्यूतिमात्रं तु परितः क्षेत्रमुच्यते। अन्नदानं जपो होमो गंगायां नात्र संश
यः॥ तटयोः प्रत्येकं क्रोशद्वयात्मकं गयायां क्षेत्रमन्यत्रानुक्तेन॥ भविष्ये च
पि। गंगासीमांतर्वर्तीनि सर्वपापान्यशेषतः। विशोदरापकायंते सिंहं दृष्ट्वा य
थामृगाः॥ एकयोजनविस्तीर्णा दिक्षु सीमा तटद्वयं॥ अत्र गुरुचरणाः॥ ॥
गर्भे प्रतिग्रहनिषेधः॥ प्रसिद्धनदीषु। प्रसिद्धतरगंडक्यादिषु तीरेष्वपि॥
गंगायां कुरुक्षेत्रेऽपीति शिष्टाः॥ पाद्मे॥ अथ चेत्प्रतिगृह्णीयाद्ब्राह्मणो वृत्तिक
र्षितः। दशांशमर्जितं दद्यादेवं धर्मो न हीयते इति शंकरभट्टीयं॥ तातांबा
त्रितयं सपत्नजननी मातामहादित्रयं सस्त्रीस्त्रीतनयादि तातजननी स्वभ्रा
तरस्त्रस्त्रियः। तातांबात्मभगिन्यपत्यधवयुग्जाया पिता सद्गुरुः शिष्याप्ताः
पितरो महालयस्य विधौ तीर्थे तथा तर्पणे॥ ॥ श्रीरस्तु

श्रीगणेशायनमः।। अग्निहोत्रेसुखासीनंगर्गःपृच्छतिशंकरं। बंधनस्थंनिरोधंचै
वव्याधीनांसंप्रपीडनं। कथंमोक्षोभवेत्तेषांसंध्यासौध्यंत्र्ह वीषिते।। शौनक
उवाच।। नक्षत्रेषुव्याधितानांपूजामंत्रंचदेवता।। गंधंपुष्पंतथाधूपंनै
वेद्यंहव्यमेवच। पूजाहोमविधानंचशृणुगर्गसमाहितः। आधानेजन्मनक्ष
त्रेजन्मेधनेवधयोगेविधौ। व्याधिरुत्पद्यतेयस्यक्लेशायमरणायवा। व्याध्यादितो
रागमोक्षार्थीसर्वदुःखविनाशनं। नक्षत्रशांतिकंकार्यंयथाविधिसमाहितैः।
भरण्यार्द्रामघाम्लेषाहस्तःपूर्वाजएकपात्। एषुरोगोद्भवोयस्यमृत्युर्वक्तिदि
नाद्दिनानिवा। तानहंसंप्रवक्ष्यामिशृणुगर्गसमाहितः। नक्षत्रदेवतानांचप्रति
मांकारयेद्बुधः।। शक्यास्वर्णमयींसम्यक्वस्त्राद्यलंकारभूषणैः।। होमात्प्राक्तत्र
रेवापिपूजास्थानंप्रकल्पयेत्। आचार्यंवरयेदादौवेदशास्त्रार्थकोविदं। हो
मार्चनाविधिंप्राहशौनकोमुनिसत्तमः। पुण्याहंवाचयेदादौ ऋत्विग्भिर्ब्राह्म
णे।सह। नक्षत्रदेवतानांचपूजांकुर्वंतियत्नतः। कर्णिकायांचविन्यस्यदेवता
प्रतिमात्रयं। उपचारैःषोडशभिराचार्यःपूजयेत्क्रमात्। संकर्षणादिदेवां
श्चपूर्वादिक्रमतोर्चयेत्। नक्षत्रदेवतास्तत्रकृत्तिकादियथाक्रमं। प्रत्येकंस
प्रसंख्याकंदिक्षुपूर्वादिषुक्रमात्। अग्निःप्रजापतिःसोमोरुद्रोदितिर्बृहस्प
ति।।सर्पाइतिप्राग्दिशिपूजयेत्। पितरोर्यमाभगःसवितात्वष्टावायुरिंद्राग्नी
दक्षिणेपूजयेत्। मित्रइंद्रोनिर्ऋतिरापोविश्वेदेवाब्रह्माविष्णुरितिपश्चाद्
वसवोवरुणोजएकपात्अहिर्बुध्न्यःपूषायमाइतिउत्तरतः। इंद्रादिलोकपा
लांश्चदिक्षुप्रागादिपूजयेत्। अग्नेरीशानदिग्भागेधान्योपरिस्थितंघटं। स
लिलौषधिवस्त्राद्यैस्तत्रमंत्रैश्चाभिमंत्रिकां। स्वशाखोक्तविधानेनआचार्योहि
ममान्वेरत्। कृत्वाज्यभागपर्यंतमन्वाधानादिपूर्ववत्। यदुक्तदेवताद्रव्यंगाय
त्र्येवक्रहोतितत्। अष्टाधिकसहस्रंवाशतमष्टोत्तरंतुवा। अष्टाविंशतिरष्टौ
वाहोमंरोगानुसारतः। प्रायश्चित्तादिसकलंहोमशेषंसमापयेत्। प्रतं
भानुदक्षेपुनैर्भुरिपोःसंकर्षणाद्याकृयोधिलिशप्रतिमांचकांचनमयीत
कर्णिकायांन्यसेत्। वासोयुग्मयुतांयथोक्तमनुनासंपूज्यचोक्तहविर्गाय=
त्र्येवक्रहोतिविप्र अथतद्रोगस्यसंशांतये।। नक्षत्रदेवताभ्यश्चनैवेद्या
दिसमर्पयेत्। आचार्यंपूजयेत्पश्चाद्दद्याद्गांपयस्विनीं। सवस्त्रप्रतिमां
कुंभमाचार्यायप्रदापयेत्। ब्राह्मणान्भोजयेत्पश्चाद्दक्षिणाभिश्चशक्तितः। ए
वंकृत्वाविधानेनसर्वदोषोविनश्यति। आयुरारोग्यसौख्यार्थंशांतिकर्मतुकार
येत्। उक्तसमिदभावेपालाशः। नैवेद्याभावेसंयावकंपायसं। शतपत्रंपु=
ष्पाभावे। धूपाभावेदशांगं। एतत्साधारणं। मत्स्यपुराणे।। ।।आश्विन्या
महोरात्रंदिनानिनववा।। अश्विनौदेवते। क्षीरमोदकलड्डुकनैवेद्यं। नीलोत्प
लंपुष्पं। घृतगुग्गुलंधूपं। देवस्यत्वेतिपूजामंत्रः।। आश्विना यज्वरीरित्यस्य
मधुच्छंदाअश्विनौगायत्री। अनेनवा। क्षीरवृक्षसमिद्द्रव्यं। गायत्र्यैवहोमः।। ।।
भरण्यांमृत्युसंदेहोवादिनानिविंशतिः। यमोदेवता। कृष्णवर्णश्चतुर्भुजःमहि
षवाहनः। दंडमुखःपाशधरः। दंडशंखचक्रधरः। गुडपूपंपायसनैवेद्यं। कृ
ष्णतुलसीपुष्पं। घृतगुग्गुलंधूपं। यमायसोमंयामोयमोनुष्टू। इतिपूजामं
त्रः। घृतमधुरतकाक्षताहोमद्रव्यं। सावित्रीमंत्रेणमहाव्याहृतिभिर्वाजुहुयात्।